© 2016 IJSRSET | Volume 2 | Issue 5 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
Themed Section: Education

# प्राचीन भारते ब्रम्हचारिणां कृते अनुष्ठेया नियमाः



प्रिति पारेश्वरि महान्ति
अनुसन्धात्री,
राष्ट्रीयसंस्कृत विद्यापीठम्,
तिरूपतिः

**सारांश: -**प्राचीन भारतवर्षे यदा ब्रह्मचारि गुरूकुलाश्रमेतिष्ठेत् तदा तत्र ब्रह्मचारि कृते अनुष्ठेया नियमाः किं? अर्थात किदृशि कर्म करणीयम् किदृशि कर्म वर्जनियम् तस्य नियमव्यवस्था किदृशि आसीदिति विषये मया अत्र शोधलेखोऽयं प्रस्तुतः

**मुख्यशब्दः** – प्राचीन, भारत, ब्रम्हचारिणः, अनुष्ठेया, नियमाः, गुरोः

**ब्रम्हचारिणां कृते अनुष्ठेया नियमाः** :-

मनुना स्पषृतया उक्तंयत-

**[1]सेवेतेमांस तु नियमान ब्रह्मचारि गुरौ वसन् ।**
**सन्नियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमान्मनः ।।**

सेवेतेति ब्रह्मचारि गुरूसमिपे वसन्निदियसंयमं कृत्वाऽनुगता ऽदृषृवृषद्ध्यर्थ-मिमान् नियमाननुतिष्ठेत् ।

**[2]नित्यं स्नात्वा शुचिः कुर्याद् देवर्षिपितृतर्पणम् ।**
**देवताऽभ्यर्चनं चैव समिदाधानमेव च ।।**

प्रत्यहंस्नात्वा देवर्षिपितृभ्य उदकदानम्, प्रतिमादिषु हरिहरादि देवतापूजनम् सायम् प्रातश्व समिद्घोमं कुर्यात् ।

यसु गौतमिये स्नाननिषेधो ब्रह्मचारिणः स सुखस्नानविषयः अत एव [3]बौधायनः :-

**नाऽप्सु श्लाघमनः स्नायात्** इति ।

[4]विष्णुनाऽत्र - **कालदूयमभिषेकाऽग्निकार्यकरणमप्सु दण्डवत् मञ्जनम्** इति ब्रुवाणेन वारदूयं स्नानमुपदिषम् ।

[5]पुनश्च मनुना स्पषृतया उक्तंयत-

**वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।**
**ब्रह्मचार्याहरेद् भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ।।**

वेदयज्ञैरिति।। वेदयज्ञैश् चाऽत्यक्तानां स्वकर्मसु दक्षणां गृहेभ्य प्रत्यहं ब्रह्मचारी सिद्धान्न भिक्षासमूहमारेत् ।

**[6]गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।**
**अलाभे त्वन्यगेहानां पूर्वंपूर्वं विवर्जयेत् ।।**

गुरोः कुल इति।। आचार्यस्य सपिण्डसषु, बन्धुषु, मातुलादिषु च न भिक्षेत। तद्गृहव्यतिरिक्तभिक्षायोग्यगृहाभावे चोक्तेभ्यः पूर्वंपूर्वं वर्जयेत् । ततश् च प्रथमं बन्धून् भिक्षेत, तत्राऽलाभे ज्ञातीन्, तत्राऽलाभे गुरोरपि ज्ञातीन् भिक्षेत ।।

**ब्रह्म चारिणां किं वर्जयते-**

यथोक्तं मनुनां-

**[7]उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकृशान् ।**
**आहरेद् यावदर्थानि भैक्षं चाऽहरहश् चरेत् ।।**

उदकुम्भमिति।। जलकलशपुष्पगोमयमृत्तिकाकुशान् यावदर्थानि यावद्भिः प्रयोजनानि आचार्यस्य तावन्त्याचार्यार्थमाहरेत् । अत एवोदकुम्भमित्यत्रैकत्वमप्य विचक्षितम् । प्रदर्शनं चैतत् अन्यदप्याचार्योपयुक्तमुपाहरेत् । भैक्षं च प्रत्यगमर्जयेत् ।।

**[8]एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित्।**
**कामाद् धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः ।।**

एक इति ।। सर्वत्र नीचशय्यादावेकाकी शयनं कुर्यात् । इच्छाया न स्वशुक्रं पातयेत् यस्मादिच्छया स्वमेहनाच् छुक्रं पातयन् स्वकीयव्रतं नाशयति । व्रतलोपे चाऽवकीर्णप्रायश्चित्तं कुर्यात ।।

**[9]दूरादाहृत्य समिधः सन्निदध्याद् विहायसि ।**
**सायम्प्तश्च जुहुयात् ताभिरग्निमतन्द्रितः ।।**
**अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।**
**अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत।।**
**व्रतवद् देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् ।।**
**काममभ्यर्थितोऽश्नीयाद् व्रतमस्य न लुप्यते ।।**

दूरादिति ।। दूराद् दिभ्यः [अ] परिगृहीतवृक्षेभ्य समिध आनीय आकाशे धारणा-ऽशक्तः पटलादौ स्थापयेत् । ताभिश्च समिद्भिः सायम्प्रातरनले होमं कुर्यात् ।।

व्रतवदिति ।। पूर्वनिषिद्धस्यकांन्नभोजनस्याऽयं प्रतिप्रसवः । देवदैवत्ये कर्मणि देवतोद्देशेनाअभ्यर्थितो ब्रह्मचारी व्रतवदिति व्रतविरुद्धमधुमांसादिवर्जितमेकस्याऽप्यन्न्नं यथेप्सितं भुञ्जीत। अथ पित्रुद्देशेनाअभ्यर्थितो भवति तदा ऋषिर् यतिः सम्यग्दर्शन-सम्पन्नत्वात् स इव मधुमांसवर्जितमेकस्याऽप्यन्न्नं यथेप्सितं भुञ्जीत इति स एवाऽर्थो वैदग्ध्येनोक्तः, तथापि भैक्षवृत्तिनियमरूपं व्रतमस्य लुप्तं न भवति। याज्ञवलक्योअपि श्राद्धेऽभ्यर्थितस्यैसकान्नभोजनमाह- [10]**"ब्रह्मचर्ये स्थितो नैकमन्नम द्यादनापदि। ब्राह्मणः काममश्नीयाच् छ्राद्धे व्रतमपीडयन् ।।"** याज्ञ. 1।32) इति। विश्वरुपेण तु 'व्रतमस्य न लुप्यते' इति पश्यता ब्रह्मचारिणो मांसभक्षणममनेन मनुवचनेन विधीयत इति व्याख्यामतम् ।।

**[11]चोदितो गुरुणा नित्यमप्रचोदित एव वा ।**
**कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च ।।**

**[12]शरीरं चैव वाचं च बुद्धिन्द्रियमनांसि च ।**
**नियम्य प्राञ्जलिस् तिष्ठेद् वीक्षमाणो गुरोर् मुखम् ।।**
**नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः ।**
**आस्यतामिति चोक्तः सन्नासीताअभिमुखं गुरोः ।।**
**हीनाऽन्नवस्त्रवेषः स्यात् सर्वदा गुरुसन्निधौ ।**
**उत्तिष्ठेत् प्रथमं चाऽस्य चरमं चैव संविशेत् ।।**

चोदित इति ।। आचार्येण प्रेरितो न प्रेरितो वा स्वयमेव प्रत्यगमध्ययने गुरुहितेषु चोद्योगं कुर्यात् ।।

शरीरं चेति।। देहवाग्बुद्धिन्द्रियनांसि नियम्य कृताञ्जलिर् गुरुमुखं पश्यंस् तिष्ठेन् नोपविशेत् ।। त्यमिति ।। सततमुत्तरीयाद् बहिष्कृतदक्षिणबाहुः, शोभनाचार वस्त्रावृत- देहः, 'अस्याताम्' इति गुरुणोक्तः सन् गुरोरभिमुखमं यथा भवति तथा आसीत।।

हीनान्नवस्त्रेति।। सर्वदा गुरुसमीपे गुर्वपेक्षया त्ववकृष्टान्नव्सत्रप्रसाधनो भवेत। गुरोश्च प्रथमं रात्रिशेषे शयनादुत्तिष्ठेत् प्रदोषे च गुरौ सुप्ते पश्चाच् छयीत।।

**[13]आसीनस्य स्थितः कुर्यादभिगच्छस् तु तिष्ठतः ।**
**प्रत्युद्गम्य त्वाव्रजतः पश्चाद धावंस् तु धावतः ।।**
**पराङ्मुखस्याऽभिमुखो दुरस्थस्यैत्य चाऽन्तिकम् ।**
**प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ।।**
**नीचं शय्याऽऽसनं चाऽस्य सर्वदा गुरुसन्निधौ ।**
**गुरोस् तु चक्षुर्विषये न यथेष्टासनो भवेत् ।।**

आसीनस्येति।। आसनोपविष्टस्य गुरोराज्ञां ददतः स्वयमासनादुत्थितः, तिष्ठतो गुरोरादिशतस् तदभिमुखं कतिचित् पदानि गत्वा, यदा गुरुरागच्छति तदाऽप्यभिमुखं गत्वा, यदा तु गुरुर् धावन्नादिशति तदा तस्य पश्चाद् धावन् प्रतिश्रवणसम्भाषे कुर्यात्।।

पराङ्मुखस्येति।। पराङ्मुखस्य चाऽऽदिशतः सम्मुखस्थः, दुरस्थस्य गुरोः समीपमागत्य, शयानयस्य गुरोः प्रणम्य प्रह्वो भूत्वा, निदेशे निकटेऽवतिष्ठतो [निकटेऽवतिष्ठमान्स्य] गुरोरादिशतः प्रह्वीभूयैव प्रतिश्रवणसम्भाषे कुर्यात् ।।

नीचमिति।। गुरुसमीपे चाऽस्य गुरुशय्याऽऽसनाऽपेक्षया नीचे एव शय्याऽऽसने नित्यं स्याताम् । यत्र च देशे समासीनं गुरुः पश्यति न तत्र यथेचेष्टां चरणप्रसारणादिकां कुर्यात् ।।

**ब्रह्म चारिणां किं वर्जयेत -**

यथोक्तं मनुनां -

**[14]वर्जयेत मधु मांसं च गन्धं माल्य स्थान् स्त्रियः ।**
**शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् ।।**

मधु मांसं च न खादेत् ब्रह्मचारी । बन्धं च कर्पूर चन्दनकस्तुरिकादि ब्रह्मचारि वर्जयेत । एषां च गन्धानां यथासम्भंवं भक्षणमनुलेपनं च निषिद्धम् । माल्यं च न धारयेत् । उदिक्तरसाश् च गुडादीन् न खादेत् । स्त्रीयश्च नोपेयात् । यानि स्वभावतो मधुरादि रंसादि कालवशेनोदकवासादिना चाऽम्लयन्ति तानि शुक्तानि न खादेत् । प्राणिनां हिंसाऽपि न कुर्यात ।

**[15]अभ्यङमञ्जनं चाऽक्ष्णोरूपानछत्रधारणम् ।**
**कामं क्रोधं च लोभं च नर्तनं गतिवादनम् ।।**

अभ्यङ्ग अर्थात तैलादिना शिरःसहित-देहमर्दनलक्षणम्, कञ्जलादिभिश च चक्षुषोञ्जनम्, पादुकायाश् छत्रस्य च धारणम्, कामं, क्रोधं, लोभं कृत्य-गीत-वीणा पणसदि वर्जयेत।

**[16]द्यूतं च जनवादं च परिबादं तथाऽनृतम् ।**
**स्त्रीणां च प्रेक्षणाऽऽलम्भमुपधातं परस्य च ।।**

द्यूतं इति उक्ते- अक्षयक्रीडाम्, जनैः सह निर्थकवाक्कलहम्, परस्य दाषेवादम्, मृषाऽमिधानम्, स्त्रीणां च मैथुनेच्छया साऽनुरागेण प्रेक्षणाऽऽलिङनम्, परस्य चाऽपकारं वर्जयेत ।

**[17]सर्वं वाऽपि चरेद् ग्रामं पूर्वोक्तानामसम्भवे ।**
**नियम्य प्रयतो वाचमभिशस्तांस् तु वर्जयेत् ।।**

सर्वं वेति ।। पूर्वं "वेदयज्ञैरहीनानाम्" (मनु. २।१८३) इत्यनेनोक्तानामसम्भवे सर्वं वा ग्राममुक्तगुणरहितमपि शुचिर् मौनी भिक्षेत । महापातकाद्यभिशस्तांस् त्यजेत् ।।

**[18]भैक्षेण वर्तयेन् नित्यं नैकाऽन्नादी भवेद् व्रती ।**
**भैक्षेण व्रतिनो वृतिरुपवाससमा स्मृता ।।**

भैक्षणेति ।। ब्रह्मचारी न एकान्नमद्यात् किन्तु बहुगृहाऽऽहृतभिक्षासमूहेन प्रत्यहं जीवेत् । यस्माद् भिक्षासमूहेन ब्रह्म्चारिणो वृत्तिरुपवासतुल्या मुनिभिः स्मृता ।।

**[19]प्रतिश्रवणसम्भाषे शयानो न समाचरेत् ।**
**नाऽऽसीनो न च भुञ्जानो न तिष्ठन् न पराङ्मुखः ।।**
**नोदाहरेदस्य नाम परोक्षमपि केवलम् ।**
**न चैवाऽस्याऽनुकुर्वीत गतिभाषितचेष्टितम् ।।**
**गुरोर् यत्र परीवादो निन्दा वाऽपि प्रवर्तते ।**
**कर्णौ तत्र पिधात्वयौ गन्त्यं वा ततोऽन्यतः ।।**

प्रतिश्रवणेति ।। प्रतिश्रवणमाज्ञाऽङ्गीकरणं सम्भाषणं च गुरोः, शय्यायां सुप्तः, आसनोपविष्टः, भुञ्जानः, तिष्ठन्, विमुखश्च न कुर्यात् ।।

नोदाहरेदिति ।। अस्य गुरोः परोक्षामपि उपाध्यायाऽऽचार्यादिपूजावचनो- पपदशून्यं नाम नोच्चारयेत् । न तु गुरोर् गमनभाषितचेष्टितान्यनुकुर्वीत गुरुगमनादिसदृशान्यात्मनो गमनादीन्युपहासबुध्या न कुर्वीत।।

गुरोर् यत्रेति।। विद्यमानदोषस्याऽभिधानं परीवादः, अविद्यामानदोषाऽभिधानं निन्दा, यत्र देशे गुरोः परीवादो निन्दा च वर्तते त्र स्थितेन शिष्येण कणौं हस्तदिना तिरोधातव्यौ । तस्मात वा देशाद् देशान्तरं गन्तव्यम्।।

चतुर्षुआश्रमेषु ब्रह्मचर्य आश्रम अन्यतम । प्राचीन भारते ब्रह्मचारिव्यवस्था व्यवस्थित भवेत् ।

जन्माद् आरभ्य पञ्चविंशति वर्षाणि यावत ब्रह्मचारि ब्रह्मचर्याश्रमे तिष्ठेत् ।
उपनयन संस्कारस्य

अनन्तरं ब्रह्मचारि गुरुकुले गुरुसमीपे तिष्ठवा बहर्मचर्य व्रत पालनं क्रियते ।
तत्र ब्रह्मचारि नियमव्यवस्था सुव्यवस्थित भवेत, एवं प्रकारेण ब्रह्मचारिणों नियमाः दृस्यन्ते।

**पाद टिप्पणी -:**

1. मनुस्मृति 2-175
2. मनु 2-176
3. बा ध सू -1- 3,40
4. विष्णु ध सू -28- 4,5
5. मनु - 2-183
6. मनु - 2-184
7. मनु - 2-177
8. मनु - 2-178
9. मनु - 2-179-185
10. या. -1-32
11. मनु- 2-191, 192, 193, 194, 1865, 188
12. मनु- 2- 196, 197, 198
13. मनु -2- 177, 178, 179, 185, 188
14. मनु- 2- 195, 199, 200

**सन्दर्भ ग्रंथ सूची-**


1. मनुस्मृति- चौखम्बा संस्कृत संस्थान, वाराणसी, 2003
2. बौधायन धर्मसूत्र- चौखम्बा संस्कृत सीरिज आफीस, वाराणसी, 1972
3. विष्णु धर्मसूत्र- बंगाल एशियाटिक सोसायिटी 1981
4. याज्ञवल्क्यस्मृति-(मिताक्षरासहिता) चौखम्बा संस्कृत प्रतिस्थान, दिल्ली 2005
5. धर्मशास्त्र स्येतिहासः - चौखम्बा संस्कृत सीरीज आफीस, वाराणसी